# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2018 - '19

**Class : VIII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क - अपठित अवबोधनम् - 10
खण्डः ख - रचनात्मक कार्यम् - 15
खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ - पठित अवबोधनम् - 30

## खण्डः क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकदा एकः वृद्धः ग्रामात् ग्रामं गन्तुम् ऐच्छत्। सः मार्गे श्रान्तः अभवत्। अतः सः मार्गे एकस्य आम्रवृक्षस्य अधः उपाविशत्। तदा सः वृक्षस्योपरि पक्वमानः - आम्रफलानि दृष्ट्वा तानि ग्रहीतुम् प्रयत्नमकरोत्। परन्तु वृद्धत्वात् तेन किमपि कर्तुं न शक्यते। तदा तत्र यदृच्छया आगताः केचन वानराः। तान् दृष्ट्वा सः वृद्धः सन्तुष्टः भूत्वा शिलाखण्डानि आदाय तान् वानरान् प्रति प्राक्षिपत्। कुपिताः ते वृद्धं प्रति फलानि आदाय प्राक्षिपन्। तानि गृहीत्वा सः वृद्धः स्व ग्रामं प्रति अगच्छत्।

**I. एकपदेन उत्तरत।** 2

क. कः ग्रामात् ग्रामं अगच्छत्?

ख. सः कस्य वृक्षस्य अधः उपविशत्?

**II. पूर्णवाक्येन उत्तरत।** 4

क. वृद्धः वृक्षे पक्वमान - आम्रफलानि दृष्ट्वा किम् अकरोत्?

ख. कुपिताः वानराः किं अकुर्वन्?

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत।** 2

क. 'एच्छत्' इति क्रियापदस्य कर्तृपदं किम्?
(आम्रः, वृद्धः, वृक्षाः, ग्रामः)

ख. 'तानि गृहीत्वा' अत्र तानि इति सर्वनामपदं कस्मै प्रयुक्तम्?
(वानराय, ग्रामाय, आम्र - फलेभ्यः, वृद्धाय)

ग. ‘आम्रफलानि’ इत्यस्य विशेषणपदं किम्?
(ग्रहीतम्, पक्वमान, वृक्षस्य, उपरि)

घ. ‘मार्गे’ इति पदस्य अत्र पर्यायपदं किम्?
(पथि, शाला, पदम्, गृहे)

**IV. अस्य अनुच्छेदकृते उपयुक्तं शीर्षकं लिखत। 2**

## खण्डः ख - रचनात्मक लेखनम्

**2. अधः प्रदत्तम् चित्रं दृष्ट्वा मञ्जुषायां प्रदत्तशब्दानां सहायता पञ्च वाक्यानि संस्कृतेन लिखत। 5**

(छात्राः, पादपानाम्, लक्षम्, कुर्वन्ति, शिक्षकैः, पर्यावरणम्, सम्भूय, क्षेत्रे, विशालम्, वृक्षारोपणम्, वनमहोत्सवः)



**3. पितरं प्रति लिखितम् अधः पत्रं मञ्जुषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत। 5**

(निमन्त्रणपत्रं, धावनप्रतियोगितायाम्, नीरजः, उत्साहवर्धनम्, भवन्तम्, नवदिल्लीतः, प्रथमम्, करिष्यामि, पितृमहोदयाः, आयोजयिष्यते)

ब्रह्मपुत्र - छात्रावासः,
(क) ----------
तिथिः

पूज्याः (ख) -----------
सादरं प्रणामाः।
अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अति प्रसन्नः भविष्यति यद् गतदिवसे अन्तर्विद्यालयीय भाषणप्रतिस्पर्धायां मया (ग) ------- स्थानं लब्धम्। क्रीडादिवसे (घ) ------- अहमेव प्रथमः आसन्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं (ङ) ---------। अयं वार्षिकोत्सवः आगामि - शुक्रवासरे (च) ----------। विद्यालयस्य पक्षतः ह्य एव (छ) -------- प्रेषितम्। अहमपि (ज) ---------

सूचयामि यद् भवान् मात्रा सह अवश्यम् आगच्छतु। मम (झ) ---------- भविष्यति। मातृचरणयोः मम प्रणामाः।

भवतः पुत्रः,
(ञ) ----------।

**4. संस्कृतभाषाया विवर्तयत।** **5**

क. We are all laughing.

ख. Girls are dancing.

ग. A crow sat on the branch of a tree.

घ. Leela is making food.

ङ. Men are walking through the forest.

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**5. उचित संख्यापदेन रिक्तस्थानानि पूरयत।** **4**

मम भ्राता खगपक्षिपरिपालने अतीव श्रद्धालुः भवति। तस्य खगालये --------- (80) कपोताः, ----------- (75) मैनाः, ---------- (93) चटकाः, ---------- (100) कुक्कुटाः च सन्ति।

**6. रेखाङ्कितानां शब्दानां सन्धिं सन्धिविच्छेदं वा लिखत।** **5**

क. वयं <u>यत्रोपविष्टाः</u> तत्र कानि वस्तूनि सन्ति।

ख. अस्माकं <u>प्रयासोऽपि</u> पर्यावरणस्य रक्षणे अपेक्षितः।

ग. <u>एतदतिरिच्य</u> सप्त केन्द्रशासितप्रदेशाः सन्ति।

घ. <u>प्रयोगः+ अयं</u> प्रतीकात्मको वर्तते।

ङ. <u>अत्रैवोक्तम्</u> न बुध्यते।

**7. मञ्जुषातः उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत।** **5**

(बहिः, श्वः, सह, नमः, उभयतः)

क. ग्रामं ------ पर्वताः वर्तन्ते।

ख. भावना मात्रा -------- विदेशं गच्छति।

ग. वृक्षकोटरात् ---------- सर्पः आगच्छति।

घ. अहं तव जन्मदिने --------- आगमिष्यामि।

ङ. सर्वे छात्राः उत्थाय वदन्ति गुरवे ---------।

**8. उचित विभक्तिं प्रयुज्य वाक्यं रचयत।** **4**

क. पथिकः -------- गच्छति। (ग्राम)

ख. स्वामी -------- धनं यच्छति। (सेवक)

ग. ---------- नमः। (भानु)

घ. ---------- अधः व्याधः तिष्ठति। (वृक्ष)

**9. अशुद्धवाक्यं शुद्धं कुरुत।** **4**

क. कुटीरे <u>एकम्</u> वृद्धा निवसति स्म।

ख.	ह्यः जगन्नाथः मथुराम् गच्छति।

ग.	वृक्षस्य उपरि बहवः फलानि आसन्।

घ.	दूरतः पर्वतः रम्यम्।

**10.	रेखाङ्कित पदेषु प्रकृति - प्रत्ययौ संयोज्य - विभज्य वा लिखत।	3**

क.	राजा राज्यं (वि + भज् + ल्यप्) पुत्रेभ्यः अयच्छत्।

ख.	राधायाः भगवत्भक्तिं दृष्ट्वा सर्वे आश्चर्यचकिताः अभवन्।

ग.	बालकाः पायसं (पा + क्त्वा) सन्तुष्टाः अभवन्।

## खण्डः घ - पठितावबोधनम्

**11.	अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

बहुधा प्रयुक्तस्य प्लास्टिकस्य दूरगामिनः घातकान् परिणामान् वयं न द्रष्टुं शक्नुमः। प्लास्टिकं कदापि न गलति, न च अपक्षीयते। यथा - अन्यानि वस्तूनि विनश्य मृत्तिकायां विलीयन्ते। प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति।

**I.	एकपदेन उत्तरत।	1**

क.	वस्तूनि विनश्य कस्यां विलीयन्ते?

ख.	पर्यावरणस्य कृते का भवति?

**II.	पूर्णवाक्येन उत्तरत।	2**

क.	वयं प्लास्टिकस्य कान्द्रष्टुं न शक्नुमः?

ख.	केन कारणेन पर्यावरणस्य कृते महती क्षतिः भवति?

**III.	भाषिककार्यम्।	2**

क.	'वर्धते' इत्यस्मिन् अर्थे गद्यांशे किं विलोमपदं प्रयुक्तम्?

ख.	'महती क्षतिः' अनयोः पदयोः विशेषणपदं किम्?

ग.	'शक्नुमः' इति क्रियापदस्य कर्तृपदं किम्?

घ.	'हानिः' इत्यस्मिन् अर्थे किं पदं प्रयुक्तम्?

**12.	अधोलिखित पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाहय स्थितः पृथिव्या इव मानदण्डः ॥
अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

**I.	एकपदेन उत्तरत।	1**

क.	नगाधिराजः कः भवति?

ख.	कस्यां दिशि नगाधिपराजः वर्तते?

**II.	पूर्णवाक्येन उत्तरत।	2**

क.	इन्दोः किरणेषु कः निमिज्जति?

ख.	पूर्वापरौ तोयनिधी वगाहय कथं इव स्थितः भवति?

**III. भाषिककार्यम्।** **2**

क. 'अनन्तरत्नप्रभव: हिमालय:' - अनयो: पदयो: विशेषणपदं किम्?

ख. निमज्जतीन्दो: - पदच्छेद: क:?

**13. अधोलिखित नाटयांशं पठित्वा उत्तराणि लिखत।**

छात्रा: - वयं सर्वे स्वदेशस्य राज्यानाम् विषये ज्ञातुम् इच्छाम:।

अध्यापिका - शोभनम्। वदत अस्माकं देशे कति राज्यानि सन्ति।

सती - चतुर्विंशति: महोदये।

श्रीलता - न ही न हि महाभागे। पञ्चविंशति: राज्यानि सन्ति।

अध्यापिका - अन्य: कोऽपि .......?

सुनिता - (मध्ये एव) महोदये मम भगिनी कथयति यदस्माकं देशे नवविंशति: राज्यानि सन्ति। एतदतिरिच्य सप्तकेन्द्रशासितप्रदेशा: अपि सन्ति।

**I. एकपदेन उत्तरत।** **1**

क. छात्रा: केषां विषये ज्ञातुम इच्छन्ति?

ख. कति केन्द्रशासित प्रदेशा: सन्ति?

**II. पूर्णवाक्येन उत्तरत।** **2**

क. अस्माकं देशे कति राज्यानि सन्ति?

ख. चतुर्विंशति: इति उत्तरं का वदति?

**III. भाषिककार्यम्।** **2**

क. इच्छाम: इति क्रियाया: कर्तृपदं किम्?

ख. एकम् अव्ययपदं चित्वा लिखत।

ग. मे भगिनी कथयति अत्र मे पदं कस्यै प्रयुक्तम्?

घ. 'मम' इति अर्थे किं पदं प्रयुक्तम्?

**14. रिक्तस्थानानि प्रदत्तशब्दै: पूरयत।** **6**

(ऊर्जितम्, हिमालय:, काष्ठपीठे, अशोकानाम्, शैलेन्द्रम्, लयाभावात्)

क. पुष्पितानाम् ---------- श्रिया सूर्योदयप्रभाम् करोति।

ख. वानरपुङ्गव: अविदूरस्थं ---------- चैत्यप्रासादं ददर्श।

ग. स: अनेकगन्धप्रवहं पुण्यगन्धं मनोहरं --------- ददर्श।

घ. आगच्छ! अस्मिन् --------- उपविशाम:।

ङ. प्लास्टिकस्य मृत्तिकायां ---------- पर्यावरणस्य महती क्षति: भवति।

च. अस्त्युत्तरस्यां दिशि देवतात्मा ----------- नाम नगाधिराज:।

**15. अधोलिखितवाक्येषु रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **5**

क. मृगात् <u>सिंह:</u> पलायते।

ख. <u>बलवन्तं</u> शीतं न बाधते।

ग. शक्रस्य <u>तक्रं</u> दुर्लभं भवति।

घ. <u>जयन्त:</u> शक्रस्य सुत: आसीत्।

ङ. कस्तूरी <u>मृगात्</u> जायते।

**16. शुद्धं पर्यायपदं चिनुत।** **4**

क. जनाः <u>प्रमादं</u> कुर्वन्ति।
(प्रमुदः, आलस्यम्, लज्जाम्)

ख. पर्यावरणस्य कृते महती <u>क्षतिः</u> भवति।
(क्षुधाः, हानिः, श्रुतिः)

ग. स्वलीला कलाभिश्च <u>निष्णाताः</u> सन्ति।
(निष्ठताः, कुशलता, कुटिलता)

घ. <u>विबुधानाम्</u> उद्यानस नाम नन्दनवनम्।
(दैत्यानाम्, मानवानाम्, देवानाम्)